तुस्वाहा॥ प्रजापतयेविश्वकर्मणे। यदस्यपारेरजसः शुक्रंज्योतिरजायत॥ तंनः पर्षदतिद्विषो
ग्नेवैश्वानरस्वा॰ अग्नयेवैश्वानरायेदं॥ नमः सुतेनिर्ऋतेविश्वरूपे स्मयंविचृतावंधमेतं॥ य
मेनत्वंयम्यासंविदानोत्तमंनाकमधिरोहयेमँस्वाहा। निर्ऋत्येविश्वरूपायै। यत्तेदेवीनिर्ऋति
राबबंधदामग्रीवास्वविचृत्यं॥ इदंतेतद्विष्याम्यायुषोनमध्यादथाजीवः पितुमद्धिप्रमुक्तः स्वा॰

प्र· देव्यैनिर्ऋत्यै। यस्यास्तेअस्याः क्रूरआसंजुहोम्येषांबंधानामवसर्जनाय॥ भूमिरितित्वाजनाविदु
२६ निर्ऋतेरितिलाहंपरिवेदविश्वतः॥स्वाहा॥ देव्यैनिर्ऋत्यै॥ असुन्वंतमयजमानमिच्छस्तेनस्येत्यांत
स्करस्यान्वेषि॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तुस्वाहा॥ देव्यैनिर्ऋत्यै॰ देवीम
हंनिर्ऋतिंवंदमानःपितेवपुत्रंदशयेवचोभिः॥विश्वस्ययाजायमानस्यवेदशिरःशिरःप्रतिसूरीवि
चष्टे॥स्वाहा॥ देव्यैनिर्ऋत्यै॰ निवेशनःसंगमनोवसूनांविश्वारूपाभिचष्टेशचीभिः॥देवइवसवि
तासत्यधर्मेंद्रोनतस्थौसमरेपथानाः॥स्वाहा॥ देवाय्यसवित्रइंद्राय॥ संवरत्वांदधाननिराहान
रातेन॥ सिंचामहाअवटमुद्रिणंवयंविश्वाहादस्तमक्षितंस्वाहा॥ अवटायाक्षितायेदं॥ नह्

लाद्वायमचतं स्यवरलं स्वपेचनं। इद्रेणं सिंचे अक्षितं॥स्वाहा॥ अवदायाक्षितायेदं॥१२॥ सीरायुंजंति कवयो
युगावितन्वतेपृथक्॥धीरादेवेषुसुम्नयास्वाहा॥ सीरेभ्यः॥१३॥ युनक्तसीराविyुगातनोतकृते योनौवपते
हबीजं॥गिराच श्रुष्टिः सभरा असंनोनेदीयइत्सृण्यापक्वमायन्स्वाहा॥ सीरेभ्यः कविभ्यः॥१४॥ लांगलंपवी
रवं स्वोवं समतिसर॥ उदित्कृषतिगामविंमभच्यं चपीवरी॥ प्रस्थावद्रथवाहनंस्वाहा॥ लांगलायेदं॥ शुनंनः
फालाविकृषंतुभूमिं शुनंकीनाशा अभियंतुवाहान। शुनंपर्जन्योमधुनापयोभिः शुनासीराशुनमस्मासुध
त्तं स्वाहा॥ फालेभ्यःकीनाशेभ्यःपर्जन्यायशुनासीराभ्यामिदं॥१६॥ कामंकामदुघेधुक्ष्वमित्रायवरुणायच॥
इंद्रायाग्नयेपूष्णओषधीभ्यः प्रजाभ्यः स्वाहा॥ मित्रायवरुणायेंद्रायाग्नयेपूष्णेओषधीभ्यः प्रजाभ्य इदं
१७॥ घृतेनसीतामधुनासमक्ता विश्वैर्देवैरनुमतामरुद्भिः। ऊर्जस्वतीपयसापिन्वमानास्मान्सीतेपयसा

२· भ्यावरुत्स्व। स्वाहा· ऊर्जस्वत्ये भूम्यै ३०३६ ॥ स्रुवेणाज्याहुतीर्हुत्वा ॥ पूर्ववत्तेन चरुणाग्नये स्विष्टकृते स्वाहा ॥ इति स्विष्ट
कृतं हुत्वा जयादि समस्तराष्ट्रभृदादि प्लवि सर्जनांतं कुर्यात ॥ तथा चोक्तं ॥ गार्ह्यस्य विवाहकृते पत्न्यो भवे
७ नायदि तत्र वन्हेः ॥ वक्ष्यामि संसर्गमनुक्रमेण गार्हपत्यं त्रस्यं सहत्वसिध्यै ॥ द्वितीयचाग्निं विधिना समिद्धा हुत्वा
यपत्न्याम वलंबितायां ॥ नमस्त आरभ्य ततः पुरस्ताद्धुत्वं वशालिति मंत्रकेन ॥ चतुर्गृहीतं जुहुयात्तदग्नावयं
त मंत्रेण समिद्धयाग्निं ॥ आरोप्य पूर्वविधिनास्वमिथ्यग्निं समिद्धं समिधं निदध्यात ॥ आजुह्वदुद्बुध्यस्व इति
द्वयेन दारैरुपस्पर्शितएव भर्ता ॥ येन्ने स्व सूक्तेन चतुर्गृहीत्वा परिस्तरेग्नौ जुहुयात्स्रुचैव ॥ समितं सं कल्प्यादि
पुरोनुवाक्यामनूच्य पश्चाच्चरुणा थयाज्यया ॥ अग्ने पुरीष्यादिकमंत्रकेन जुहुत्वावदानक्रमतः स्रुवी थ ॥ तथा
पुनः स्विष्टकृतेनदोयवन्हेः नतीत्वां निधायवार्हिषि ॥ पुरीष्य आरभ्य ततोनुवाकं प्याभिर्जुहुयाभिर्जुहुया

त्मकेण॥ अष्टादशाहुतयोयघृतेन देयास्ततः स्विष्टकृतं जुहोति॥ पूर्वावदानं चरुणाथ समिच्चरुं[illegible]ज्यादिकं
ब्रह्मविसर्जनं स्यात्॥ ॥ इति विश्वनाथभट्टविरचितायां विश्वप्रकाशपद्धतौ द्विभार्याग्निद्वयप्र[illegible]गतिविधा
नं समाप्तं॥ ॥ अथ जन्मदिननामकरणान्नप्राशनचौलोपनयनविवाहवास्तुगृहप्रवेशनैमित्तिकादिष्वा
त्यादिषु ग्रहयज्ञं कुर्यात्॥ ग्रहयज्ञं प्रवक्ष्यामि लोकानां हितकाम्यया॥ येनाचरितमात्रेण सर्वान्कामानवाप्नु
यात्॥ सूर्यः सोमश्च भौमश्च बुधश्चैव बृहस्पतिः॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः क्रमात्॥ रुद्रो गौ
री स्कंदविष्णू ब्रह्मेंद्रौ च यमस्तथा॥ मृत्युश्चित्रगुप्तश्च एतास्त्वधिदेवताः॥ अग्निरापस्तथा पृथ्वी पुरु
षः स्त्रीं द्रस्तथा॥ शचीप्रजापतिः सर्पाः ब्रह्मा प्रत्यधिदेवताः॥ रुद्राग्नी गौर्यपौ स्कंदपृथ्वी विष्णुः सपूरुषः॥
ब्रह्मा शक्रौ इंद्रेंद्राण्यौ यमः सप्रजापतिः॥ मृत्युः सर्पौ चित्रगुप्तब्रह्माणौ च यथाक्रमं॥ सूर्यादीनां च स

प्र॰ वेषामधिप्रत्याधिदेवताः। गणेशदुर्गावायुः खमश्विनौ पंचदेवताः॥ द्वात्रिंशद्देवताः श्वस्थामिंद्राद्यैः सदस्तृज्ञये
५ त॥ इंद्रोऽग्निर्यमनैर्ऋत्यवरुणावायुसोमकाः॥ ईशानोब्रह्मचानंतोदिक्पालादशदिशश्च॥ मंगलस्नानमादौ
तु कृत्वा च स्वयं प्रयत्नतः। स्नानमेपुण्यदेशेऽतुरंगवद्धीविराजते॥ भद्रासनोपविष्टो तु स्वस्तिवाचनपूर्वकं। ग
णेशावरणावभ्यर्च्य कृत्वा पुण्याहवाचनं॥ द्विजैः साधं शास्त्रप्रज्ञैर्विदधीतविधानतः। वास्तुपुरुषनमस्कृत्य भूपा
ष्याभिरतप्रभा॥ मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदेति॥ वास्तोष्पते प्रतिजानीहि त्रिभिर्मंत्रैर्यजेद्विभुं॥ ततः
संकल्प्य विधिवद्गृहयज्ञं समाचरेत॥ कुमारस्य विवाहादौ लग्नकुण्डेथगोचरे॥ दुष्टस्थानस्थग्रहदृष्ट्या तु दोषानि
वारणाय च॥ शुभस्थानफलावाप्त्यै स्वाभीष्टफलसिद्धये॥ फलंचयानमल्पेय॥ श्रीकामः शांतिक वायद
यज्ञं समाचरेत॥ दृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नपि॥ ततो वेदविदं प्राज्ञमाचार्यं वृणुयात्सुधीः॥

पुष्पचंदनतांबूलवासःकनकाभ्रपर्णैः। ब्राह्मणान्पूजयात्रदद्दीक्षितश्चयथाक्रमं॥ नववाचतुरो··पा। धित
चैकमेववा॥ वस्त्राद्दिगुणंदेयमाचार्यायकुटुंबिने॥ वक्ष्यतेथप्रतिसरबंधनस्यक्रमःशुभः। दूर्वाः
पीतसूत्रंचदधिदूर्वाघृताक्षताः॥ जीरायवाःकुशाएतानकारयेत्ताम्रभाजने॥ सहस्रशीर्षागायत्रीत्र
हलाविरूपास्त्रियंबकं॥ आशुःशिशानोमाबुक्ष्वगणानांजातवेदसे॥ तच्छंयोःस्वस्तिमंत्रैश्चअभिमंत्र्याथ
रक्षयेत॥ नारायणस्तुपूर्वस्यांवाराहोभ्यस्तुदक्षिणे॥ प्रद्युम्नःपश्चिमेपातुवासुदेवस्तथोत्तरे॥ ईशान्यां
रक्षकोविष्णुराग्नेय्यांतुजनार्दनः। नैऋत्यांपद्मनाभस्तुवायव्यांमधुसूदन॥ ऊर्ध्वंगोवर्धनधरोह्यधस्तात्त्रिवि
क्रमः॥ केशवःसर्वतःपातुकीर्तितांश्चाष्टौनिक्षिपेत॥ अथाचार्यःप्रतिसरंग्रहेभ्यःकलशायच॥ बध्वाकरे
पार्वत्राणायजमानादिबाहुषु॥ विश्वेत्तातेतिबध्नीयाद्दूतामेतिरक्षयेत॥ हस्तमात्रंततःकुंडंचतुर

प्र·
स्त्रं प्रकल्पयेत ॥ चतुरंगुलविस्तारो मेकां कुर्याच्च मेखलं ॥ तावदुच्छ्रायसंयुक्तामथवा मेखलात्रयं ॥ द्वित्र्येकांगु
लोच्छ्रायाधस्ताराभ्यां समन्वितां ॥ तासामुपरि योनिं च पार्श्वयो रंगुलोच्छ्रितां ॥ कूर्मपृष्ठोन्नतां मध्ये षट्सप्तां
गुलविस्तृतां ॥ ध्व ॥ वितस्तिमात्रां कुर्वस्तु गजोष्ठसदृशाकृतिं ॥ अथवाश्वत्थपत्राभां सनालछिद्रसंयुतां ।
अथवा स्थंडिले वा हस्तमात्रं चतुरस्रं प्रकल्पयेत ॥ तस्य पूर्वोत्तरे भागे यद्वायतनमुत्तमं ॥ चतुरस्रं हस्तमा
त्रं वितस्त्युच्छ्रयसंयुतं ॥ विदध्याद्बुधो वेदिं रमणीयामुदक्प्लवां ॥ द्व्यंगुलोन्नते तस्या मेकैकांगुलविस्तृते ॥
समंतान्मेखले कुर्याद्वितानं चोपरि न्यसेत ॥ अथ कुंडे स्थंडिले वाग्न्याधानविधिनामकधीः प्रतिष्ठाप्याग्निमध्वा
वत्थालंकृत्य तत्परं ॥ शुक्लतंदुलपूर्णाभ्यां वेघांसस्थापयेद्बुधः ॥ मध्ये भानुं ताम्रवर्णं तद्दले मं [illegible] ॥
[illegible] ॥ आग्नेयामशतैः शुभ्रैः सोमं तु चतुरस्रकं ॥ त्रिकोणमरुणं भौमं दक्षिणस्यां दिशि न्यसेत । पीत

सीशानदिग्भागेबुधंबाणसमाहृतं॥ गुरुं दीर्घचतुष्कोणमुत्तरे पीतवर्णकैः॥ पंचकोणात्मकं शुक्रं पूर्वतः शु
क्लतंडुलैः॥ कृष्णवर्णैः पश्चिमतः शनिं तु धनुराकृतिं॥ शूर्पाकृतिं च नैरृत्यां राहुं धूम्रैः प्रकल्पयेत्॥ हे: रासनेय
कलुं वायव्यां ध्वजसंनिभं॥ आदित्याभिमुखानेतान् साधिप्रत्यधिदेवतान्॥ चंद्रादींश्चैव संस्थाप्य पूजयेत्कु
सुमादिभिः॥ स्कंदपुराणे॥ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमः शेषा दक्षि
ण क्षोदिङ्मुखा गृतिः॥ अधिष्ठानेषु चैतेषु यथाविभवसारतः॥ ग्रहाणां प्रतिमाः कार्याः संस्थाप्यश्चैव लक्ष
णाः॥ ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ॥ रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात्॥ मूर्तिपरि
माणं गोभिलः॥ अर्कमकांगुलैः १२ कुर्याच्चतुर्विंशाद्भिर्विधुं॥ भौमं बुधं गुरुं शुक्रं विचतुः षडंगुलैः॥ द्वा
भ्यां शनिं राहुमर्कैः केतुमध्यर्धमंगुलं॥ अंगुलेनोच्छ्रितान्कुर्यात् ऊह्यानादानं कारादिनः॥ प्रणवाद्व्याहृतिभिः

प्र॰ जन्मगोत्रादिलक्षितान ॥ प्रतिमासूत्ररूपासुयद्दानावाहयेनतः । ठ कुंचसूक्तं द । जन्मभूगोत्रमेतेषां वर्णस्थानमु
खादि च ॥ योज्ञाताकुरतंशांतियदास्तेनावमानिताउ ति ॥ ब्रह्माथदेवीगायत्रीपरमात्माग्निरेवच ॥ ऋषिश्छंदोदे
० वताश्चप्रणवस्य प्रकीर्तिताः । जमदग्निर्भरद्वाजभृगवोमनयः स्मृताः । गायत्र्युष्णिगनुष्टुप् छंदांस्येतानिवैक्रमा
त ॥ अग्निर्वायुश्चसूर्यश्चव्याहृतीनांतु देवताः ॥ एतदावाहनपूजादौविनियोगः प्रकीर्तितः ॥ ॐ भूर्भुवः सुव
रिति आसत्येनेतिपूजयेत ॥ आसत्येनेत्यस्यच ऋषिर्हिरण्यस्तूपसंज्ञकः ॥ त्रिष्टुप्छंदः समाख्यातं सविता
देवतास्मृता ॥ अथध्यानं ॥ ऐंद्राग्न्यः दोकलिंगेषुरणमथातथौसप्तमीनाम्निजातंपद्मासीनंसपद्माभ
यकरमुदितंकाश्यपाख्यंचगोत्रं । सप्ताश्वोद्यल्पतीकाध्वजिनिरथवरेधिष्ठितंक्षत्रजातिंताम्रेस्मिन्मूर्ति
बिंबेसदयमभिमुखंसूर्यमावाहयामि ॥ तदर्शेचेद्रुदंअधिदेवंकद्रुद्रमंत्रतः ॥ ऋषिःकण्वःस्यगाय

त्रीष्टुं छंदो रुद्रश्च देवता॥ अग्निं दूतमृचेऽग्निर्वामेऽप्रत्यधिदेवतां॥ ऋषिर्मेधातिथिः छंदो गायत्र्यग्निश्च दे
वता॥ आप्यायस्वेत्यृचा सोमं यजेद्दस्याश्च गोतमः॥ ऋषिः छंदश्च गायत्री देवता सोम उच्यते॥ कालिं चात्रि
त्रिका यां जानितमथातिथ्योऽत्तु भूताभिधाने गोत्रे चात्रेः सहारं सगरस्वरकारं कुंदगोक्षीरगौरं॥ विश्वं शुक्ले
पताकाध्वजवतिं च रथे राजमानं दशाश्वे वेदाश्वे मंडलेऽस्मिन्नाविमभिसमुखं सोममावाहयामि॥ यजेद्गौरी
ऋचा गौरीं दक्षिणेऽस्याधिदेवतां॥ ऋषिर्दीर्घतमाः छंदो जगती देवमास्मृता॥ आपो यजेद्दक्षमेतिवा
मे प्रत्यधिदेवतां॥ सिंधुद्वीप ऋषिः छंदो गायत्र्या यश्च देवता॥ २॥ अग्निर्मूर्धेति मंत्रेण यजेत् कुजमन
न्यधीः॥ ऋषिर्विरूपो गायत्री छंदो भौमोऽस्य देवता॥ भारद्वाजं दशभ्यां जानितमपि पयोदैवतक्षेप्यवंत्यां
प्रातिं शूलं गदासीदधतमथ करे रुद्रजं वह्निवर्णं॥ क्षत्रं रक्तध्वजः स्थितमपि सुरथे मेषगेरकवस्त्र

न· सेपवीतेनरक्तपार्श्वाभिमुखमधिवलं भौममावाहयामि॥ यदक्रंदेतितदक्षिणेस्कंधः पृथ्व्योधिदेवता॥ ऋषिर्मे
१ धातिथिः त्रिष्टुप् छंदस्कंदो देवता॥ स्योनेतिपूज्ययद्रुमे पृथ्वीप्रत्यधिदेवता॥ ऋषिर्मेधातिथिः छंदोगा
यत्रीभूश्च देवता॥३॥ उद्बुध्यस्वेति मंत्रेण बुधमावाहयेद्बुधः॥ अग्निस्त्रिष्टुप् बुधश्चास्य ऋषिश्छंदस्च देव
ता॥ दूरादेशंबावासवर्क्षेमगधजनपदेञ्चात्रिगोत्रप्रसूते खड्गं खेटं गदाब्जंवरमपिदधतं पाणिभिः पीतवर्णं
ऊद्यत्सीत ध्वजाढ्येसमरगपातरथेवस्थितं वैश्यमत्रस्थानेबाणानुकारे रविमभिरचिरं सौम्यमावाहयामि
॥ तच्चक्षेर्चेद्विष्णुमिदंविष्णुरित्यधिदेवता॥ ऋषिर्मेधातिथिः छंदोगायत्रीदेवताहरिः॥ सहस्रशीर्षापुरु
षंवामे प्रत्यधिदेवता॥ ऋषिर्नारायणोनुष्टुप् छंदोदेवश्च पूरुषः॥४॥ बृहस्पतेअतीयदर्योमितपुष्मेनरंद्र
स्पतिं॥ ऋषिर्गृत्समदः त्रिष्टुप्छंदोदेवोबृहस्पतिः॥ भागक्षेसिंधुदेशेऽपिद्वाशिखसंगोत्रआंगिरसो

ख्येन्नातं रं डंकमंडल्वाभिरुजित वरौ बिभ्रतं चाक्षमालां॥ पीताश्वोग्रपताकाध्वजसमरथगतं दीक्षवेदाश्च
पीतविभ्रं सत्पुष्परागाभरणमभिरवं जीवमावाहयामि॥ ब्रह्माणं दक्षिणे भ्यर्चेद्ब्रह्मज्ञानामितिऋचा॥ न
कुलोस्या ऋषिस्त्रिष्टुप छंदो ब्रह्माधिदेवता॥ इंद्रं मिन्द्र मरुत्वेति वामे प्रत्यधिदेवतां॥ विश्वामित्र ऋषिस्त्रिष्टुप
छन्द इंद्रोस्य देवता॥ ५॥ शुक्रं तं डल्चाशुक्रं शुक्लपुष्पैः समर्चयेत्॥ भरद्वाज ऋषिस्त्रिष्टुप छंदः शुक्रश्च देव
ता॥ ॐ तं भोजकर्दरूढं भृगुकुल पुष्पेन वम्यां भुजैर्भ्राजद्दंड कमंडलूचस वरावक्षस्त्रजो बिभ्रतां॥ चंचत्पांडु
पताक सप्ततुरगैर्माणुरथे पांडुरं पंचास्येसदने गुरुं द्दिति भुवामावाहयामः कविं॥ इंद्रश्च इत्यनेनं इंद्र देवश्चेदधि
देवतां॥ मधुः छंदा ऋषिः छंदो गायत्री इंद्रोस्य देवता॥ इंद्राणी मासितो द्राणी वामे प्रत्यधिदेवतां॥ ऋषिर्वृषा
कपिः छंदः पंक्तिः शच्यस्य देवता॥ ६॥ शंनोदेवीतिमंत्रेण नीलपुष्पैः प्रपूजयेत्॥ सिन्धुद्वीप ऋषिः छंदो गा

यत्रीदेवतान्प्रानिः॥ अश्वम्यांयः स्मृतः श्वेसमजानिविधिभेकश्यपस्यान्ववायेश्च शूद्रोनीलाद्रितुल्यः करस्थतन्रारत्नतूणी
रखड्गाभयाढ्यः॥ भाजनीलाभगश्च ध्वजरथनिलयंनीलमाणिक्यभूषं॥ स्थानेधन्वावृतोतंरवापितुरभिमुखं
सौरिमावाहयामि॥ इमंयमेतिदशेलधिदेवंयमंयजेत्॥ ऋषिर्यमः स्मृतोग्निहुपछंदोवैदेवतायमः॥ वामेप्र
जापतेनत्वादिनिप्रत्यधिदेवतां॥ हिरण्यगर्भऋषिस्त्रिष्टुपछंदोदेवः प्रजापतिः॥ ७॥ राहुंकयानश्चित्रेतिकृष्णपुष्पै
ःप्रपूजयेत्॥ गायत्रीवामदेवोस्यराहुः छंदर्षिदेवताः॥ राकायांपाम्यजःक्षेसमजानिमलयेयस्यपेठीनसिःयःशूद्र
द्रःस्वद्रूंच्छ्रलंसनरमापिदधञ्चघर्मचर्मवराभुः॥ रुसंहसमध्वजायद्वारिणारिपुरथस्थायिनंव्याघ्रवक्त्रंसूर्याभिमं
उलेतंतरणिमभिगतंराहुमावाहयामि॥ कालंयमायसोमेतिरक्षेचेदधिदेवतां॥ ऋषिर्यमोनुष्टुबस्यछंदःकालश्च
देवता॥ नमोस्तिवितिमपांश्चवामेप्रत्यधिदेवतां॥ सर्पस्तुऋषिःछंदोनुष्टुपसर्पाःश्चदेवता॥ केतुंकृण्वन्नचाकेतुं

स पुष्पैः प्रपूजयेत् ॥ गायत्र्यस्याम धुः छंदाः केतुः छंदर्षिर्देवता ॥ अंतर्वेद्याममायां जानितमुरगभेजैमिनायेव
गोत्रे वैडूर्याकल्पमुदयसमग्रदं वरकं चित्रमात्यानुरूपं ॥ चित्रं वं च कपोतध्वजपताकिचरथे सन्तमंतर्ध्वजाभस्था
ने सूर्याभिवक्त्रं यवनजमतुं केतुमावाहयामि ॥ साचित्रमितिजदक्षो चित्रगुप्तमथार्चयेत् ॥ त्रिष्टुप् भरद्वाजाश्चित्र
गुप्ताः छंदर्षिदेवता ॥ ब्रह्माणं ब्रह्मजज्ञानमिति वामे प्रत्यधिदेवता ॥ नकुलोस्य ऋषिः त्रिष्टुप् छंदो ब्रह्मादिदेवता ॥ ॥
इत्यधिदेवप्रत्यधिदेवसहितग्रहपूजनं ॥ आद्या विनायकादिपंचलोकपालाः ॥ गणानां त्वेति गणपतिं दोरस्तर
तोयजेत् ॥ गणक ऋषिर्जगत्यस्य छंदो देवो विनायकः ॥ मंत्रेण रेयजेद्दुर्गां जातवेदस इत्यृचा ॥ कश्यपोस्या ऋषि
स्त्रिष्टुप् छंदो दुर्गा च देवता ॥ आनो नियुद्भिरित्यृचा वायुमुत्तरतोरवेः ॥ वसिष्ठोस्य ऋषिस्त्रिष्टुप्छंदो वायुर्देव
ता । घृतं घृतेन यजुपात्वाकाशं राहुदक्षिणे ॥ यावां कशात्यश्विनौ तु केतोर्दक्षिणतो यजेत् ॥ त्रं नः सोपऋषि

प्र· छंदो गायत्री देवताश्विनौ॥ पंचैतानथ वा देवान् रुद्राणामुत्तरे यजेत्॥ ॥इंद्रादीनथ दिक्पालानयजेत्पूर्वादि
दिक्रमात्॥ गायत्री त्रोमधुःछंदो इंद्रमिंद्रं च इत्यृच॥ सहस्राक्षं गजस्कंधं शचीं गौरं वज्रोत्पलोत्करं॥ मेधातिथ्य
3 ग्निगायत्र्याग्निमग्निं दूतमित्यृच॥ त्रोणवर्णं छागगतं धृतज्वालाकमंडलुं॥ यामामुष्टुप यमास्तद्यमा
येतियमं यजेत्॥ सदंडपाशं रक्ताक्षं कृष्णमहिषवाहनं॥ आग्नस्त्रिष्टुप्नैर्ऋतिश्वासन्वंतमितिनिर्ऋ
तिं॥ खड्गचर्मधरां नीलां मूर्ध्वकेशां नवाहनां॥ अश्लावरुणगायत्र्याविमंमेवरुणं यजेत्॥ नागपाशधरं
शुक्लं मकरस्कंधकिरीटिनं॥ वायुमानोनियुद्भिश्चत्रिष्टुप वासिष्ठवायव॥ वरध्वजकरं धूम्रं मृगस्थं चित्र
वाससं॥ छंदोतिजाघ्कर्मपयोरुणा देवः कुबेरकः॥ राजाधिराजमंत्रेण सगदं नरवाहनम्॥ शुक्लांबरं
निधिपातं धनदं लकापातं॥ महोदरं दूरिहूर्णयजेदाभरणान्वितं॥ गोतमोजगतीशानस्तमीशानं

ध्युमापतिं॥ वराभयत्रिशूलाक्षस्रक्करं गौरमक्षगं॥ सर्पराज्ञ नुष्टुप सर्पा नमो अखिलत्यनंतकं॥ पद्मशं
खगदाचक्रधरं सप्तफणोज्वलं॥ अनंतशयनासीनं मध्ये वरुणरक्षसोः॥ ब्रह्माणं ब्रह्मजज्ञानमिति द्रि
ग्रांतरे यजेत॥ हंसस्थं श्मश्रुलं शोणं तं बोधरं जटाधरं॥ कमंडलुस्रुवाक्षस्रुक्पुस्तपाणिं चतुर्मुखं॥ वि
श्वामित्र ऋषिस्त्रिष्टुप छंदो ब्रह्मास्य देवता॥ क्षेत्रस्य पतिनेत्यर्चेत क्षेत्रपालं तु दक्षिणे॥ त्र्यंबकेन
मंत्रेण रुद्रो मृत्युंजयं यजेत॥ क्रमेणासनपाद्यार्घ्याचमनीयान्यतः परं॥ स्नानं पंचामृतैर्दद्यात्तत्त
न्मंत्रैः पृथक्पृथक्॥ आप्यायस्वेति पयसा गायत्री गोतमः पयः॥ दधिक्राव्णो अनुष्टुप दधि
क्राव्णोति वै दधिः॥ प्रजापतिर्ऋषिर्देवमाज्यं शुक्रमसीति च॥ स्वादुः पवस्वेति सितां जगती वे

प्र· नत्रार्कराः। मधुवाताइति मधुगायत्रीगोतमोमधु॥ शुध्यस्नानंततोदद्यात्पुनराचमनीयकं॥ वस्त्रा
नु लेपपुष्पाणि स्वस्वकर्माण्युपाहरेत्॥ रक्तश्वेतेरक्तपीतपीतश्वेतासितानि च॥ श्यामलं वा विचित्रं च वा
सांस्येषां यथाक्रमं॥ रक्तचंदनमर्काय श्रीचंदनमथेंदवे॥ रक्तं वा देवदारु वा कुंकुमाय बुधजीवयोः॥ मानांगालं
कौंकुमं वा श्वेतं वा नारं वत्तं भृगोः। शनेः पिण्याकजं राहोः केतकीगर्भजं रजः॥ कस्तूरी केतवे यद्वा त्रयाणा
मगरुस्मृतं॥ सर्वेषामथवा दद्याच्चंदनं मलयोद्भवं॥ त्रिभ्यो रक्तोत्पलकुमुदे रक्तं च करवीरकं॥ द्वाभ्यां च
पाटलं मल्ली भृगोर्विंदीवरं शनेः॥ राहुमुन्मत्तकं राहोश्चित्रपुष्पाणि केतवे॥ धूपाः कुंदुरुकः साज्या
क्षताः सर्जरसो गुरुः॥ सिल्हकं सागुरुर्वा ऽथ गुग्गुलुः शनये स्मृतः॥ राहुकेत्वोः स्मृता लाक्षा सर्वेषां वाथ
गुग्गुलुः।

गव्येनसार्षपादीपः सर्वेषांतिलजेनवा॥ अथनैवेद्यानि॥ गुडौदनंपायसंचैवऽपेहविष्यंक्षीरषाष्टिकं॥ दध्यो
दनाद्यौदनौचकृसरंमाषकौदनं॥ चित्रौदनंचनैवेद्यंरव्यादिभ्यःप्रदापयेत्॥ अन्येषामपिसर्वेषांभक्ष्य
भोज्यानिशक्तितः॥ तांबूलमुखवासादिदत्वाकृत्वानमस्कृतिं॥ वेद्याईशानदिग्भागेस्थापयेत्कलशंशुभं
॥ अव्रणंसुदृढंनव्यंदध्यक्षतविभूषितं॥ मंडलेतंडुलैःपूर्णपांडुरैःसमनोहरं॥ आजिघ्रकलशमंत्रमु
च्चार्यकलशंन्यसेत्॥ पूरयेत्तीर्थसलिलैरिमंमेगंगइत्यथ॥ युवंवस्त्राणिमंत्रेणवासोयुग्मेनवेष्टयेत्॥ उध
तासीत्यष्टमृदोश्वत्थेवइतिपल्लवान्॥ पंचत्वक्पंचमूलानितेनैवकलशेक्षिपेत्॥ गजाश्वरथ्यावल्मीकसंगम
ह्रदगोष्ठगाः॥ राजद्वारगताश्चाष्टौमृत्तिकाःपरिकीर्तिताः॥ वटाश्वत्थोदुंबराम्रप्लक्षाणांपल्लवाःस्त्वचः॥
सांद्रिरत्नानीतिरत्नान्यथगव्यानिपंचच॥ मणिमुक्ताप्रवालानिगारुडंपुष्परागकं॥ वज्रेंद्रनीलगोमेद

न. वैदूर्यं मणयो नव ॥ सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं ॥ पंचैतान्यथ चैकं वा माणिक्यमुत कांचनं ॥ गोमू
त्रमथ गायत्र्या गंधद्वारेति गोमयं ॥ आप्यायस्वेति गोक्षीरं दधिक्राव्णेति गोदधि ॥ गवाज्यं शुक्रमसीति या
५ ज्ञाता इत्यथौषधीः ॥ मुरामांसीवचाकुष्ठं शैलेयं रजनीद्वयं ॥ सटीपंचैकमुस्ताश्च सर्वौषधिगणाः स्मृताः ॥
गंधद्वारेत्यथा गंधं कुसुमान्यायनेतिवै ॥ याः फलिनीरिति फलं कुंभे सर्वं विनिक्षिपेत् ॥ ततोभिमंत्रयेत्कुं
भं मंत्रैरेतैः स्पृशन्कुशैः ॥ अमृतस्थापनार्थाय निर्मितो विश्वकर्मणा ॥ कलां कलां हि देवानां गृहीत्वा प
रमेष्ठिना ॥ निर्मितोत्र कलाश्चैते कलशस्तेन प्रोच्यते ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र
स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ गंगा च यमुना चैव चंद्र
भागा सरस्वती ॥ अर्जुनी गोमती चैव नर्मदा च महानदी ॥ कावेरी रह्मवेणी च तापी गोदावरी तथा ॥

ताम्रपर्णीपयोष्णीचसरयूर्गंडकीतथा॥विंध्यपादोद्भवायाश्चश्रीशैलाद्याविनिर्गताः।प्रभासंपुष्करंचैव
नैमिषंचहिमालयं।चरेश्वरंत्रिशूलंचगंगासागरसंगमं॥अर्बुदंहेमवांश्चैवमानसंचमहासरः॥पृथि
व्यांयानितीर्थानिकलशेतानिसंतुवै॥अथशांतिश्चपुष्टिश्चगायत्रीचव्यवस्थिता॥ऋग्वेदोथयजुर्वेदः
सामवेदस्तथैवच॥अथर्वसहितामंत्रैःकलशंपूरयंतिमं॥विश्वकर्मन्समागच्छदिवाकरसमप्रभ॥स्व
हस्तेनत्वयाकुंभोविन्यस्तोयागमंडपे॥ब्रह्माद्यादेवताःसर्वाःऋषयश्चतपोधनाः॥गंगाद्याःसरितःसर्वाः
समस्तकुलपर्वताः।तिष्ठंतुकलशेसर्वेयावद्यज्ञःसमाप्यतइति॥इममेवरुणेत्यस्मिन्कुंभेवरुणमर्चयेत॥प्रजाप
तिश्चगायत्री।विरूपाद्यास्त्वपांपतिः।सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयांतुमेसदासर्वेदुरित
क्षयकारकाः।पूर्ववत्पूजनंचास्यततोन्वाधानमाचरेत॥यथाअस्मिन्कर्मणिरव्याद्याः।प्रधानेनवदेवताः।

ग्र॰ रुद्राग्न्याद्यानयनेन अधिप्रत्यधिदेवताः॥ विनायकाद्या रुद्राद्याः सर्वांश्चैवांगदेवताः॥ समिदादिहविर्भिश्च तंत्रं
सांगेन कर्मणा॥ स ग्रहोऽयत्य इति प्रोच्य समिधोऽजुहुयाद्बुधः॥ सांगाः सर्वत्र देवाः संतु संनिहिता इह॥ इत्युक्त्वा सकु
६ शं वारिविघ्नमंत्रेण संस्पृशेत्॥ निर्वपेच्चरुं मध्ये भ्यो देवस्य त्वेति मंत्रतः॥ प्रोक्षणं च पवित्राद्याज्यसंस्कारांतं य
थाविधि॥ कृत्वाथ कर्ता देवेभ्यो यष्टव्यं द्रव्यमुत्सृजेत्॥ इध्माधानादिकं कृत्वा मुखाहुत्यंति कं ततः॥ प्रतिग्रहं प्र
ति द्रव्यं हुत्वा दशदशाहुती॥ तथाधिदेवतादीनां तिस्रस्तिस्रोऽथ वैककाः॥ हुत्वाव्याहृतिभिः श्चाथ जुहुयाद्दिसं
ख्यया॥ तदुक्तं याज्ञवल्क्ये॥ यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत्॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्य
थ॥ ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहा इति॥ द्रव्याणि समि
दाज्यं चरुश्च तिलयवादयः॥ अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः॥ औदुंबरः शमी दूर्वा कुशाश्च समि

धःक्रमात्॥एकैकस्याश्चाष्टशतमष्टाविंशतिरेववा॥होतव्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवायुताः॥समिल्लक्ष
णंचोक्तं॥विशीर्णाविदलाह्रस्वावक्राःसशिराःकृशाः॥अतिस्थूलातिदीर्घाश्चसमिधःकार्यनाशना
॥विशीर्णायुःक्षयंकुर्याद्विदलापुत्रनाशिनी॥सशिराव्याधिजननीकृशाचारिपुवर्धिनी॥दीर्घाविदेश
गमनीस्थूलाचात्मविनाशिनी॥अशिरासमनीस्थूलासार्द्राचसुफलाशिनी॥प्रादेशान्नाधिकान्यूनाःस
मिधःसर्वकर्मणि॥अर्कोनाशयतेव्याधिंपालाशःसर्वकामदः॥खदिरःश्चार्थलाभायअपामार्गस्सुखप्र
दः॥अश्वत्थःसर्वकामायसौभाग्यायाप्युदुंबरः॥शमीशमयतेपापंदूर्वायुःसुखवर्धिनी॥कुशाश्च
मार्थकामानांरक्षणंचसतांमतं॥दूर्वाहुतौह्यदूर्वस्यात्कुशास्तंबःकुशाहुतिः॥तत्राधिदेवतादीनांपा
लाशःसमिधःस्मृताः॥उक्तालाभेतुसर्वेषामपिपालाशएववाहि॥अथहोमेपिआदित्यादीनांग्रहाणां

प्र. प्रजयामित्छंदा बिंदेवतादिकमुक्त्वा स्वस्वमंत्रैर्होमंकुर्यात॥तद्यथा॥आसत्येनेत्यस्य मंत्रस्याहिरण्यस्तू
७ पआंगिरसस्त्रिष्टुप्छंदः। सविता दे० सूर्यप्रीतयेसमिदाद्रव्यहोमे विनियोगः॥आसत्येनेति मंत्रेणजु
हुयात॥एवंचंद्रादीनामाप्यज्ञातव्यं॥प्रधानहोमंकृत्वेदं दत्वास्विष्टकृदाहुतिं॥समित्संहनेहुत्वाजया
दीनजुहुयात्ततः। यदस्येति स्विष्टकृतं हुत्वा बर्हिः समंजनं॥कृत्वाप्रहृत्यपरिधानप्रायश्चित्ताहुतिस्त
तः॥चित्तादिकंजयाद्युक्तमनाज्ञातादिकं पुनः॥पूर्वाघारोजयादिश्चस्रुवेणैवस्रुचेतराः॥पूर्णाहुतिंस्रुचाद
द्यात्तद्वादशगृहीतया॥फलवस्त्रादियुतयावक्ष्यमाणेश्चमंत्रकैः॥समुद्रादूर्मिरितिऋग्वामगौतमोवामदे
वकः॥ऋषिः छंदस्त्रिष्टुबग्निर्देवतापरिकीर्तिताः॥बार्हस्पत्योभरद्वाजः ऋत्रिष्टुब्वैश्वानरस्तृचः॥मूर्धानेति
पुनस्ताग्निस्त्रिष्टुप्वृत्तादयस्त्रयः॥पूर्णादर्विज्युत्स्रुचोविश्वेदेवानुष्टुप्शतक्रतुः॥सप्ततेग्नेश्चजगतीस

सप्तान ग्निरित्यपि॥ इत्थं पूर्णाहुतिं हुत्वा चोत्तरं परिषेचनं॥ पूर्णपात्रोद्वासनं च कृत्वाथ स्थालिविसर्जनं॥ ब्रह्मणे
पूर्णपात्रं च दद्याद्ब्रह्मा तत्लक्षणं॥ तथा॥ अष्टमुष्टिभवेत्किंचित् किंचिच्चत्वारि पुष्कलं॥ पुष्कलान्येव चत्वारि
पूर्णपात्रं सकांचनं॥ पूर्णपात्रमिदं प्रोक्तं तंदुलैः पूरितं सदेति॥ ततस्तु लोकपालेभ्यो माषभक्तबलीन्हरेत्॥ पो
लिकापूपसहितान्सोदकान्क्षतैः सह॥ स्वस्वमंत्रैः स्वस्वदिक्षु च मन्त्रैः पूर्वादिदिक्क्रमात्॥ गृह्णातु हुतः शेषं पाले
बलिं रक्षाम दक्षिणे॥ वज्रहस्त्या जातिरुद गृह्णाणमं बलिं हर॥ यजमानस्य मेभ्युदयं कुरु रक्षेम मध्वरं॥ मेष
रूढ्याति हस्ताग्ने गृह्णाण मं बलिं च वै॥ यजमानस्य मेभ्युदयं कुरु रक्षमम ध्वरं॥२॥ सदंडमहिषारूढा गृह्णा
ण मं बलिं यम॥ यजमानस्य मेभ्युदयं कुरु रक्षमम ध्वरं॥३॥ नावस्थ रक्षः स्थूलाख्य गृह्णाण बलिमार्पितं
।यजमानस्य०॥४॥ सर्षस्थपाशधृक् पाशिन् गृह्णाणमपि बलिमपर्तं॥ यजमानस्य०॥५॥ नायोमृग

·प· स्थध्वज धनुर्गृहाणे मं बलिं विभो। यजमानस्य० ६॥ यक्षेनासगरस्थाद्दबालिस्लेयंनवाहनं॥यजमान०

८ ॥७॥ वृषस्थश्शूलहस्ते त्वंगृहाण मंत्र लिंहर॥ यजमान०॥९॥ सचक्रानंतनागेंद्रमहाधरबलिंहर॥यज

मानस्य०॥९॥ हंसस्थाक्षकरब्रह्मन गृहाणे मं बलिं स्वभूः॥यजमानस्य०॥१०॥ कपालहस्त क्षेत्रेश

गृहाणे मं बलिं विभो॥यजमानस्य०॥११॥ व्याधुच्च पूजनं कुर्याद्व्यादानां यथाक्रमं॥ कन्नास्यपचन्देश्च

धूपदीपानिवेद्यकैः॥पुनः पुष्पांजलिं दत्वा नमस्कृत्या विसर्जयेत॥ यांतु देवगणाः सर्वे पूजामादाय मामि

कां॥इष्टकामप्रदानार्थं पुनरागमनाय च॥ति॥ अथाभिषिंचेत्तन्मंत्रै यजमानं सदानुगं॥गृहीत्वा वारुणं कुं

भं वेद्याः पूर्वेथ चोत्तरे॥ अप्लिंगाः पावमान्यश्च हैरण्याः सौरभास्तथा॥आयुष्या ग्रहमंत्राश्च तथा पौरा

णिकाः परे॥ तथा पौराणिकाः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगंनाथः स्तथा संक.

र्णोविभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहितः शेषो दिक्पालाः पांतु ते सदा॥ कीर्तिर्लक्ष्मी
र्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः॥ एतास्त्वामभिषिं
चंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतु रा
हुकेतुश्च तर्पिताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मनवो गावो देवमातर एव च॥ देवपत्न्यो द्रु
द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि का
लस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वामभिषिंचंतु सर्वकामार्थसि
द्धये॥ अभिषिक्तस्ततश्चैव यजमानः सह स्त्रिया॥ शुक्लांबरधरः श्रीमान् शुक्लमाल्यानुलेपनः। धृता
नि पूर्ववासांसि आचार्याय प्रदापयेत्॥ आचार्याय ब्रह्मणे च ऋत्विग्भ्यो दक्षिणाः क्रमात्॥ गोभू

ग्र. तिलान्हिरण्यमाज्यं वासांसि विविधानि च ॥ आचार्याय च देयानि येन वा तोषमाप्नुयात् ॥ अथाज्यावेक्षणं दद्या
६९ त् ॥ या लक्ष्मीर्यज्ञमे दौस्थ्यं सर्वांगेषु प्रतिष्ठितं ॥ तत्सर्वं नाशमायात्वाश्रुध्विय मायुश्च वर्धय ॥ इति कां-
स्यपात्रपूरितमाज्यं सकांचनं सदक्षिणाकं ब्राह्मणाय दद्यात् ॥ अथ ग्रहदक्षिणाः ॥ धेनुः शंखस्तथा
नड्वान्हेमवासोद्वयः क्रमात् ॥ कृष्णा गौरायसं छाग एता वै ग्रहदक्षिणा ॥ मंत्राश्च मात्स्ये ॥ कपिले सर्वदेवानां
पूजनीयासि रोहिणी ॥ धेनुस्तीर्थमयी यस्मादतः शांतिं प्रयच्छ मे ॥ १ ॥ पुण्यस्त्वं शंख पुण्यानां मंगला
नां च मंगलं ॥ विष्णुना विधृतो नित्यमतः शांतिं० ॥ २ ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक ॥ अष्ट
मूर्तेरधिष्ठानमतः शांतिं० ॥ ३ ॥ हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसो ॥ अनंतपुण्यफलदमतः शां
तिं० ॥ ४ ॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं ॥ प्रदानात्तस्य मे विष्णुमतः शांतिं० ॥ ५ ॥ विष्णुर्

श्वेतरूपेण यस्माद मृतसंभवः ॥ चंद्रार्कवाहनो नित्यमतः शांतिं० ॥६॥ धेनुः त्वं पृथिवी सर्वा यस्मात्केश
वसंनिभा ॥ सर्वपापहरा नित्यमतः० ॥७॥ यस्मादायसकर्माणि तवाधीनानि सर्वदा ॥ हलो हलांगला
दीनां तस्माच्छांतिं० ॥८॥ यस्मात्त्वं छागयज्ञानामाङ्गत्वेन व्यवस्थितः ॥ यानं विभावसोर्नित्यमतः शांतिं० ॥
॥९॥ यथा नक्षत्र दक्षिणालाभं गोदद्याच्छान्यस्ते स्मृताः ॥ तत्र मंत्रः ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ सर्वान्प्रदक्षिणीकृत्य नमस्कुर्यात् ॥ बौधायनः ॥ ग्रहा गावो
नरेंद्राश्च ब्राह्मणाश्च विशेषतः ॥ पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥ तस्मान्न दक्षिणाहीनं क
र्तव्यं भूतिमिच्छता ॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु ॥ नामान्नचोलोपनयग्रहयज्ञं समाचरेत् ॥ नि
र्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च ॥ आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं ॥ संतानवृद्धिः कीर्तिश्च भ

न॰

वेश्मैवा प्रवेशयः॥ महाशांतिं पाठयित्वा भोजयित्वा च द्विजान् ततः॥ ऋत्विजो ब्राह्मणांश्चान्यादीनानाथां
श्च तोषयेत्॥ ततश्च बंधुभिः सार्धं स्वयं भुंजीत वै सुखं॥ वाञ्छयेन गुणाने यं स तां कंगवि भूषणं॥ ग्रथि
ता विश्वनाथेन ग्रहमुक्तावली शुभा॥ ॥ इति विश्वप्रकाशे ग्रहयज्ञविधिः॥ ग्रहपंचाशिरस्यंते॥ मध्ये
ताम्रतंडुलमंडलं॥१॥ आग्नेय्यां शुभ्रैश्चतुरस्रं॥२॥ त्रिकोणमरुणैर्भौमं दक्षिणे॥ पीतैरीशाने बुधं
बाणवत्॥ बृहस्पतिं पीतैर्लक्षोत्तरे दीर्घचतुरस्रं॥ शुभ्रैः शुक्रं पूर्वकोणं पूर्वतः॥ कृष्णैः पश्चिमे शनिं चा
पवत्॥ राहुं धूम्रैः शूर्पवन्नैर्ऋत्यां॥ चित्रैः केतुं वायव्यां ध्वजवत्॥ तदुत्तरे चारुणं घटं न्यसेत्॥ कलश
स्य मुखे रत्नादि॥ पूजाहोमानंतरं माषभक्तबलिं सर्वेषां॥ क्षेत्रपालस्य च॥ ततो यजमानस्याभिषेकं॥
दक्षिणादानं॥ ॐ अथ मंत्राः॥ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च॥ हिरण्ययेन स

रथेनादेवो याति भुवनानि पश्यन्॥ चंद्रः॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा वाज
स्य संगथे॥ मंगलः॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं॥ अपाꣳरेताꣳसि जिन्वति॥ बु
उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सꣳसृजेथामयंच॥ पुनः कृण्वꣳस्त्वा पितरं युवानमं
न्वाताꣳसीत्त्वयि तंतुमेतं॥ बृहस्पतिः॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीद
यच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं॥ शुक्रः॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी
द्यौरिवासि॥ विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ शनिः॥ शंनो देवीरभिष्टय
आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥ राहुः॥ कया नश्चित्र आभुवदूती सदावृधः सखा॥ क
या शचिष्ठया वृता॥ केतुः॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे॥ समुषद्भिरजायथाः॥ ९॥ ॥

ऋ॰ अथाश्विरवला॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे॥ वोचेम शंतमं हृदे॥१॥ गौरीर्मिमाय सलि
लानि तक्षत्येकपदी द्विपदी सा चतुष्पदी॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्
१ ॥२॥ यदक्रंदः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तु
त्यं महि जातं ते अर्वन्॥३॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं॥ समूढमस्य पांसुरे॥४॥ ब्रह्म जज्ञानं
प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥५
इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥६॥ इमं यम प्रस्तरमा हि सीदांगिरोभिः पि
तृभिः संविदानः॥ आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व॥७॥ यमाय सोमं सुनुत यमा
य जुहुता हविः॥ यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥८॥ स चित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं

वयोधां॥त्वंदूरंरयिंपुरुवीरंबृहंतंचंद्रचंद्राभिर्गृणतेयुवस्व॥१॥अथप्रत्याधिदेवता॥अग्निंदूतंवृणीमहे
होतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुं॥१॥अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा॥अग्निंचविश्व
शंभुवं॥२॥स्योनापृथिविभवानृक्षरानिवेशनी॥यच्छानःशर्मसप्रथाः॥३॥सहस्रशीर्षापुरुषः
सहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृत्वा॥अत्यतिष्ठद्दशांगुलं॥४॥इंद्रमरुत्वइहपाहिसोमंयथा
शार्याते अपिबःसुतस्य॥तवप्रणीतीतवशूरशर्मणाविवासंतिकवयःसुयज्ञाः॥५॥इंद्राणीमासु
नारिषुसुपत्नीमहमश्रवं॥नह्यस्याअपरंचनजरसामरतेपतिः॥६॥प्रजापतेनत्वदेतान्यन्योविश्वाजा
तानिपरितावभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥७॥नमोअस्तुसर्पेभ्यो
येकेचपृथिवीमनु॥येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः॥८॥ब्रह्मजज्ञानं॥९॥इतिप्रत्यधिदेवता॥

प्र. अथविनायकादयःपंच॥ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं॥ ज्येष्ठराजंब्रह्मणां
ब्रह्मणस्पतआनःशृण्वंनूतिभिःसीदसादनं॥१॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः
२ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥२॥ आनोनियुद्भिःशतिनीभिरध्वरंसहस्रि
णीभिरुपयाहियज्ञं॥ वायोअस्मिन्हविषिमादयस्वयूयंपातस्वस्तिभिःसदानः॥३॥ घृतंघृतपावा
नःपिबतवसांवसापावानःपिबतांतरिक्षस्यहविरसिस्वाहात्वांतरिक्षायदिशःप्रदिशआदिशोवि
दिशउद्दिशस्वाहादिग्भ्योनमोदिग्भ्यः॥ इत्याकाशं॥४॥ यावांकशामधुमत्यश्विनासूनृतावती॥
तयायज्ञंमिमिक्षतं॥ उपयामगृहीतोस्याश्विभ्यांत्वैषतेयोनिरश्विभ्यांत्वा॥ इत्यश्विनौ॥५॥ इतिपं
चलोकपालाः॥ अथइंद्रादिलोकपालानांमंत्राः॥ इंद्रविश्वतः१ अग्निंदूतं२॥ यमायसोमं३

अस्म॒न्वंनमयन्नमा नमि छस्तेन स्पेल्पांनस्करस्यान्लेप। अन्य मस्माद्विछसात इत्यान मो देवानिर्ऋति
तु भ्यमस्तु॥४॥इमं मे वरुणश्रुधीहवम द्याचमडय॥त्वामवस्युराचके॥५॥आनोनियुद्भिः॥६॥
राजाधिराजायप्रसह्यसाहिने॥नमोवयं वैश्रवणायकुर्महे॥समेकामान्कामकामायमह्यं॥का
मेश्वरोवैश्रवणो ददातु॥ कुबेरायवैश्रवणाय॥महाराजायनेमः॥७॥तमीशानंजगतस्तस्थुषस्प
तिंधियंजिन्वमवसेहूमहेवयं॥पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये॥८॥नमो
अस्तुसर्पेभ्यो॥९॥अग्निर्नेतानं॥१०॥क्षेत्रस्यपतिनावयंहितेनेवजयामसि॥गामश्वंपोषयित्न्वास
नोमृडातीदृशे॥११॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात
॥१२॥तद्विष्णोःपरमंपदंसदापश्यंति॥ ॥इतिग्रहादीनांमंत्राः॥सप्ततेअग्नेसमिधःसप्तजिह्वाःस

ग्र. मर्षयः सप्त धामप्रियाणि॥ सप्तहोत्राः सप्त धात्वा यजंति सप्त योनीरापृणस्वा घृतेन स्वाहा॥ इतिपू
र्णाहुतिमंत्राः॥ ॥ अज्ञानाज्ञानादिति। विश्वप्रकाशाभिधपद्धतौ न कृतं समासा॥ ग्रहशांतिरेषा॥ ॥
3 अथ विनायकशांतिः॥ याज्ञवल्क्यः॥ विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः॥ गणानामाधि
पत्ये च रुद्रेण ब्रह्मणा तथा॥ एवं विनायकस्याधिकारिकं व्यापारमभिधाय तेन गृहीतस्य स्वप्न
दर्शनानि प्रत्यक्षदर्शनानि चाह॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत॥ स्वप्नेऽवगाह
तेऽत्यर्थं जलं मुंडांश्च पश्यति॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैः स
हैकत्रावतिष्ठते॥ व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः॥ विमना विफलारंभः संसीदत्य
निमित्ततः॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः॥ कुमारी च न भर्तारमपत्यं गर्भमंगना॥ आ

चार्यत्वंश्रोत्रियस्यनाप्याध्ययनंतथा॥ वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः॥ एवंवि
नायकगृहीतस्यचिन्हान्यभिधायविनायकोपसर्गपरिहारकंकर्माह॥ स्नपनंतस्यकर्तव्यं
पुण्येह्निविधिपूर्वकं॥ गौरसर्षपकल्केनसाज्येनोत्सादितस्यच॥ सर्वौषधैःसर्वगंधैर्विलिप्त
शिरसस्तथा॥ भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः॥ अश्वस्थानाद्गजस्थानाद्वल्मीका
त्संगमाध्रदात्॥ मृत्तिकांरोचनांगंधान्गुग्गुलुंचाप्सुनिक्षिपेत्॥ याआहृताएकवर्णैश्चतुर्भिःकं
लशैर्ह्रदात्॥ चर्मण्यनडुहेरक्तेस्थाप्यंभद्रासनंततः॥ सहस्राक्षंशतधारमृषिभिःपावनंकृतं॥ तेन
त्वामभिषिंचामिपावमान्यःपुनंतुते॥ भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः॥ भगमिंद्रश्चवायु
श्चभगंसप्तर्षयोददुः॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि॥ ललाटेकर्णयोरक्षरापःस्तद्घ्नं

प्र॰ गुमर्वदा। स्नातस्यमार्षपंनेलंस्नुवेणोदुंबरेणतु॥ जुहुयान्मूर्धानकुशान्सव्येनपरिगृह्यतु॥ मित्रश्चसोम
५८ तश्चैवतथान्नालकटंकटौ॥ कूष्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्विते॥ नामभिर्बलिमंत्रैश्चनमस्कारस
मन्विते॥ अंतेस्वाहासमन्वितैर्मूर्धनिजुहुयादित्यन्वयः॥ तथाविधिर्बलिमंत्रैर्बलिंदद्यादित्यध्याहृत्य
योज्यं॥ बलिर्बलिप्रकारमाह॥ दद्याच्चतुष्पथेपूर्वंकुशानास्तीर्यसर्वतः। गृत्नाशस्तांस्तंडुलांश्चपललौदनमे
व च॥ मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु॥ पुष्पंचित्रंसुगंधंचसुरांचात्रिविधामपि॥ मूलकंपूरिकापू
पांस्तथैवोंडेरकस्रजः॥ दध्यन्नंपायसंचैवगुडपिष्टंसमोदकं॥ एताःसर्वानुपाहृत्यभूमौकृत्वाततःशिरः॥ वि
नायकस्यजननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षपपुष्पाणांदत्वार्घ्यंपूर्वमंजलिं॥ शस्ताःसरूदयुहृताःपल
लौदनस्तिलपिष्टमिश्रश्चओदनः। आमाअपक्काः। एतावदेवतु। पक्वंअपक्वंमांसमित्यर्थः। पुष्पंचित्रं

रक्तपीतादि॥ सुगंधि द्रव्यं॥ त्रिविधा सुरा॥ गौडी पैष्टी माध्वी च। मूलकं। कंदाकारो भक्ष्यविशेषो मूलकं।
च॥ ओदे रक्तस्रजः ओदे रक्ताः पिष्टविकारा नानाविधाः ते प्रोक्ताः स्रजः इत्युच्यंते॥ गुडपिष्टं गुडमिश्रं ग्रोल्या
दिपिष्टं॥ अन्यत्प्रसिद्धं। रुपस्नानमंत्रमाह॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि
सर्वकामांश्च देहि मे॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरो
रपि॥ असमर्थश्चेत गुरोराचार्याय वस्त्रयुग्ममात्रमपि दक्षिणां दद्यात॥ समर्थश्चेत्सामर्थ्यानुसा
रेण वित्तशाठ्यं न कार्यमिति स्मरणात॥ इति याज्ञवल्क्य प्रोक्त विनायक शांतिः॥ अथास्यैव प्रयोगः
अथोच्यते तत्र संभाराः गोरोचना पंचमृत्तिकाः। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमात् ह्रदात॥ चंदना
गरुकस्तूरीकर्पूराद्याः सुगंधयः। गौरसर्षपकल्काश्च गव्याज्येनाभिमिश्रितः॥ गुग्गुलुश्चापि संशुद्धः

२ सर्वौषधिगणस्तथा॥ मुरामांसीवचाकुष्ठंशैलेयंरजनीद्वयं॥ सटीचंपकमुस्ताचसर्वौषधिगणःस्मृतः॥
चत्वारःकलशाःसवर्णाश्चअस्फुटिताव्रणाः॥ सूदोदकयुताःपिस्यांनिम्नगासंगमोदकं। सन्ध्यायापुष्करमार
५ मंत्रमंत्रानरुद्रंतथा॥ श्रीपर्णीकाश्मपात्रश्चसहकारस्यपल्लवाः। अश्वत्थपल्लवाश्चास्युःसुगंधिसुमनांस्य
पि॥ स्रजःशोभनगंधाश्चविचित्रकुसुमानिच॥ कलशोवेष्टनार्थायनववस्त्रचतुष्टयं॥ पीठस्याच्छादनार्थंतु
शुभ्रंवस्त्रमथापरं॥ गणेशाच्चिवयोरर्थंवस्त्रयुग्मंसुशोभनं॥ आचार्यदक्षिणार्थंतुमहार्हवसनद्वयं॥
पंचवर्णानिपिष्टानिस्वस्तिकस्यापनिर्मितेः॥ तेभ्यश्चसार्द्रपिंतदुडुदुंबराभिनिर्मिताः। स्रुवःकुशाश्चवरस्था
लीस्थालीपाकार्थंतंदुलाः॥ किंचिद्दुग्धान्नियाकृतान्नंदुलाश्चापरंतथा। तिलपिष्टनसंयुक्तओदनःशूर्प
एवच॥ पक्वान्नमन्यांश्चापक्वान्नमांसंपक्वमपक्वकं॥ गौडीपैष्टीमाध्वीचत्रयंचात्रिविधासुरा॥ मत्स्यादि

कं.स.रा नं चानि पिधं यस्य यज्ञतत ॥ नयाज्यं तु विग्रोवेणाद्दिने स्यात्यासराकादा ॥ यत्र मानस्त. भृ द्रव्ये दाढु
जेरुत्थान्नियात्रयेत ॥ मत्यक्ष मृलकं.चास्मात् दुनं.भस्य मत्थारंति ॥ अपूपाः पूरिकाश्चैव वोंडरकं स्वजः ॥ व
र्तलैश्च तु रसैश्च दाघैः पिष्टविनायकैः ॥ निर्मिताः स्वज उच्यंते उंडेरकं समाख्यया ॥ दध्यन्नं पायसं चैव
पिष्टं च गुडमिश्रितं ॥ लड्डुकाश्च तथा दूर्वाः सर्षपा गौर संज्ञिताः ॥ गणेशप्रतिमां चैव गौर्यश्च प्रतिमां तथा
एवं संभृतसंभारः शांतिं कुर्यात् शुभेऽहनि ॥ विनायकशांतिं कर्तुकामः स्वचंद्रताराबलोपेतेऽह्नि तत्रादावभ्यंग
स्नो च नित्यकर्मानंतरं मम मुक्षमयाजनार्थमित्यकर्म करिष्य इति संकल्प्य पुण्याहवाचनं संपन्नं ब्राह्मणमस्मिन्कर्म
णि तामाचार्यं वृ.कुर्वीत गंधपुष्पाक्षताद्यैरभ्यर्चयेत ॥ तथान्यांश्च चतुर्ऋत्विजो वृणीत ॥ अथार्त्विगभिः सहित
आचार्यः कर्म कुर्वीत। गोमयोपलिप्तस्थले रंगे तंदुलैः पंचवर्णैः पिष्टैर्भद्रासनार्थं मंडलं कारयेत ॥ तस्य संलि
स्वास्तिकं

न. कस्य पूर्वादिदिक्षु चतुरः स्वस्तिकान्कारयेत ॥ कलशस्थापनार्थं । तंत्रमध्यस्वस्तिकोपरि रक्तमानं दृढं चर्मो
नगोलोमंत्रार्चानग्नौ वं संस्थाप्य तत्पीठे श्वेतवस्त्रेण प्रच्छादयेत ॥ ततश्चतुर्दिक्षु स्वस्तिकेषु अव्रणास्फुटितं कल
६ शान नवर्णाश्चतुरः श्वेतचंदनचर्चितान स्रग्दामवेष्टितकंठान्वा द्वितयस्य भूमिपिनान ॥ धान्यराशौ निधाय स्वदा
कनन दीसंगमोदकेनवा पूरयित्वा ततः सुधूताम्भि चरादेण वस्मिनक्षालनवाहुना ॥ मृत्तिके हर मे पापं यन्मया दुष्कृ
तं कृतं ॥ इत्यनेन मंत्रेण पंच मृदः संस्थाप्य । गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियं ॥ इति मंत्रेण चंदनागरकस्तूरीकर्पूरादीन गंधान गोरोचनागुग्गुलुं विनाक्षम्यामांसादि
वटाश्वत्थपल्लवेष्वन्यतमानि पल्लवानि कलशमुखेषु यथाशोभं विनिक्षिपेत ॥ ततश्चत्वार ऋत्विजः पूर्वादि
दिग्वस्थितकलशेषु तं तो अग्ने वरुणस्य विद्वान देवस्य हेडो अवयासिसीष्ठाः ॥ यज्ञिष्ठो वह्नितमः शोशु

चानोविश्वाद्दुषांऽसप्रमुग्ध्यस्मत॥ इत्यनेनमंत्रेणवास्वस्वशाखापारिपठितस्वरूपप्रकाशकैर्मंत्रांतरैर्वा। ॐ
भूर्भुवःस्वर्वरुणेतिव्याहृतिभिर्वावरुणायनमइतिनाममंत्रेणवावरुणमावाह्यषोडशोपचारपूजांचानिर्व
त्यापूर्वोक्तामानोभद्राःक्रतवोयंतुविश्वतइत्यादिकांवास्वस्वशाखापठितांवाऋगालिंपठेयुः॥ एतस्मिन्नवस
मयेआचार्योभद्रासनस्योत्तरभागेईशान्यांवाविनायकंतज्जननीमंबिकांचपीठादिषुसंस्थाप्यप्रतिष्ठा
प्यवक्ष्यमाणमंत्राभ्यामावाहनप्रभृतिनैवेद्यपर्यंतांपूजांकुर्यात्॥ तत्पुरुषायविद्महेवक्रतुंडायधीमहि।
तन्नोदंतिःप्रचोदयात्॥ इतिविनायकमंत्रः॥ सुभगायैविद्महेकाममालिन्यैधीमहि॥ तन्नोगौरीप्रचोदया
त्॥ अंबिकामंत्रः॥ अथगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यचरुंश्रपयित्वा॥ ततोगवाज्यस्थालीकृतेन
गौरसर्षपकल्केनोद्वर्तितांगंसर्वौषधिचूर्णैस्तथाचंदनागरुकस्तूरिकादिभिश्चावलिप्तसर्वांगस्ययजमा

ग्र. नं भद्रासनमुपवेश्य गृह्योक्तमार्गेण स्वस्तिवाचनं कुर्वीत ॥ ऋत्विगादिब्राह्मणादसहित आचार्यः स्वस्ति
वाचनानंतरं च जीवत्पतिपुत्राभी रूपगुणशीलिनीभिः सुवेषाभिः स्त्रीभिः कृतमंगलं यजमानमभिषिंचे
७ दाचार्यः ॥ तत्र पूर्वं दिशावस्थितं कलशमादाय । सहस्राक्षं शतधारमृषिभिः पावमानं कृतं ॥ तेन त्वामभि
षिंचामि पावमान्यः पुनंतु ते इत्यनेन मंत्रेणाभिषिंचेत ॥ ततो दक्षिणदिगवस्थितकलशमादाय । भगं ते वरु
णो राजा भगं सूर्यो बृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो विदुः ॥ इत्यनेन मंत्रेण तदनंतरं पश्चिम
देशावस्थितं कलशं गृहीत्वा । यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु
सर्वदा ॥ इत्यनेनाभिषिंचेत ॥ ततः उदग्दिश्यावस्थितं कलशमादाय पूर्वोक्तैः सहस्राक्षमित्यादिभिस्त्रि
भिर्मंत्रैरभिषिंचेत ॥ एवमभिषिच्य सव्यपाणिगृहीतकुशाग्रेण यजमानस्य मूर्धनि सार्षपं तैलमादद्

भग्रेणादायवक्ष्यमाणमंत्रैर्जुहुयात्॥ ॐ मिताय स्वाहा। ॐ संमिताय॰ ॐ शालाय॰ ॐ कटंकटाय॰ ॐ कूष्मां
डाय॰ ॐ राजपुत्राय स्वाहा॥ एवं षड्भिर्मंत्रैर्मूर्ध्नि हुत्वा तदनंतरं पूर्वोक्तेनचरुणा पूर्वोक्तैः षड्भिर्मंत्रैस्तस्मि
न्नेवाग्नौ चरुं हुत्वाग्नेरिंद्रादिदिक्षु अभिषेकशालायां चेंद्रादिलोकपालेभ्यः स्वस्वनाममंत्रैर्बलिं दद्यात्॥ ना
ममंत्रास्तु॥ इंद्राय नमः। अग्नये॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ सोमाय॰ ईशानाय॰ ब्रह्मणे॰ अनंता
य॰ अथ यजमानः स्नात्वा शुक्लमाल्यांबरधरो गुरुणा सहितो विनायकायांबिकायै च। कृतास्तंडुलाश्च प
क्वौदनमेव चेत्यादिना विनिर्दिष्टं कृताकृतद्रव्यजातमुपसंहारं दत्वा ततः शिरसा भूमिं गत्वा कुसुमसहिते
नोदकेन त्र्यंबकं पूर्वोक्तं विनायकांबिकां गायत्रीभ्यां मंत्राभ्यामर्घं दत्वा तथा दूर्वासर्षपपुष्पांजलिं च दत्वा विना
यकमातृकां चोपतिष्ठेत॥ उपस्थानमंत्रास्तु॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान् देहि धनं देहि सर्व

प्र. कामांश्च देहि मे॥ इति अत्र मंत्रे भगवन्देहि मे भगमित्यूहं कृत्वा प्रथमतो विनायकमुपस्थाय पश्चाद्वया पठितेन
मंत्रेण गविक्षामुपतिष्ठेत॥ ततश्च आचार्यः शूर्पे कृत्वा नानाविधोपहारं ॐ पंतत्रानि ध्याय चतुष्पथं गत्वानंतवक्ष्य
५ माणमंत्रैर्बलिं दद्यात्॥ मंत्रास्तु॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा॥ मरुतोथाश्विनौ रुद्राः सुपर्णाः
पन्नगा ग्रहाः। असुरा यातुधानाश्च पिशाचा मातरो गणाः॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः
शिवाः॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः
शां०३ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः॥ सौम्या भवंतु तृप्ताः
श्च भूतप्रेताः सुखावहाः॥ इति चतुष्पथबलिदानमंत्राः॥ अनंतरमाचार्याय वस्त्रद्वयसहितां दक्षिणां
स्वशक्त्यनुसारेण दत्वा विभवानुसारेण ऋत्विगादिभ्योपि॥ अन्येभ्यो ब्राह्मणेभ्योपि भूरिदक्षिणां दत्वा·

ब्राह्मणान्भोजयित्वाशिषोवाचयित्वाब्राह्मणान्विसर्जयेत्॥ ॥अजीजनादिति॥विश्वप्रकाशाभिध
पद्धतौतुशांतिःसमाप्ताचविनायकस्य।इतिविनायकशांतिः॥ ॥अथगर्भाधानमुच्यते॥तत्रप्रथमा
र्तवेसमयफलनिर्णयः।तत्रगुरुः।आदौतिथिफलं।प्रथमादिफलंज्ञेयंपतिहंत्रीःसुखाभवेत्॥ल
क्ष्मीश्चवत्पत्नीपुत्रलाभःस्वामित्वविक्रिया॥पुत्रवृद्धिःपुत्रनाशोरतोधर्मशालिनी॥पतिस्निग्धाक्रं
दतीस्याद्धनमानवतीशुभा॥बहुदुष्टान्यसक्तास्यात्पर्वण्येवमतःफलं॥शुभंचैवतुपूर्वाह्णेमध्यां
न्हेमध्यमंफलं॥अपराह्णेतुवैधव्यंपूर्वरात्रेस्त्रियंभवेत्॥मध्यमंमध्यरात्रेस्यात्पररात्रेशुभान्विता॥
रतावेवंतिथिफलंवाराणांफलमुच्यते॥प्रथमर्तौभानुवारेव्याधिश्चंद्रेपतिव्रता॥बहुरोगाल्कुश्रा
वतीपतिहीनाकुजेदिने॥बहुपुत्रवतीसौम्येसर्वसंपद्गुरौभृगौ॥पतिव्रतासुखंभाग्यंमंदेव्याधिश्च

प्र. वैरिणि ॥ नारदः ॥ सगुणा पतिव्रता दुःखी पुत्रिणी भोगभागिनी ॥ पतिप्रिया क्लेशभागी सूर्यवारादिषु
क्रमात् ॥ अथ नक्षत्रफलं ॥ करादिपंचोत्तरमूलपूर्वाविशाखात्रयाश्वीन्यादिधीदुर्भेषु ॥ आद्यं रजः सौख्य
सुतायुरर्थसौभाग्यवृद्धिं कुरुतेंगनानां ॥ श्रीधनं सुतसौभाग्यं निर्दुष्टा वस्त्रभूषणं ॥ सुरगुरुपतिबंधु
भक्ता मान्याश्विभे रजतो ॥ परपुरुषरता याम्ये पतिहीना बला खला ॥ सज्जनद्वेष्यन्त्यस्थावृ स्वकुभूषाभिः
स्वलंकृता ॥२॥ मान्या सहास्या प्रियवाक् पुत्रमित्रधनान्विता ॥ पूर्वाश्वत्य श्वश्रुजाप्रेष्या वान्हिभे मध्य
मं फलं ॥३॥ पिता मह द्वेष्टि सगुणा सुरनाथमन्त्रीतिना ॥ पतिबंधुप्रिया पुत्रधनाढ्या प्रियवादिनी ॥४॥ सदा
रोगभाग्यवर्ता विपुलार्था पतिव्रता ॥ बहुप्रजा बहुज्ञानं बंधुमान्या पतिप्रिया ॥ रौद्रे पत्युरुतानि स्वापि
पुलार्था दुःखभागिनी ॥ परकार्यरया मिथ्याभाषिणी प्रथमार्तवे ॥६॥ मायाविनी लांपटिका वंध्या

यकुचाग्निका॥पितृसम्यरताद्रत्येपरसंतानमोहिनी॥७॥पुष्पेत्वगम्यागमनेरतापुत्रवतीखला॥स्रगं
धपुष्पाभरणसत्कारगीतविनोदिनी॥खलापुनर्भूर्भोगेव्याधिदुष्टार्थलंपटी॥स्वछंदगाथमाया
द्याकुलाद्यानिर्धनाभवेत॥९॥पतिप्रियामघायांतुकुलदाचप्रजावती॥सिंहीव्योम्निदूरंरंदमध्येखचो
तवर्चसा॥बहुव्ययपरायेमणोभीरभंगव्रतारवला॥पानासक्तातुसंदुष्टादुष्प्रत्राकुलनाशिनी॥११॥
भाग्यभाग्यवतीनारीधनपुत्रवतीप्रिया॥कुलद्वयानंदकरीपतिसंतानबोधिनी॥दृस्तेसंभोगलोलास्या
दुंध्वर्थापरकार्यकृत॥सखागतावपक्षास्याछूत्रासवंगुणांगना॥१३॥त्वसमेरूपालुःस्मरतप्रियावात्म
द्भितेरता॥संगतिविद्यानिपुणानिर्वैरामयपीडिता॥१४॥दृढव्रतासत्यरतास्वात्यंतुगजगामिनी॥पुत्रपौ
त्रैःपरिवृतासदामंगलमोहिनी॥दूदेवक्षेप्रमत्ताम्याछत्रसंघाविनाशिनी॥अनीचामोतिसंभोगंविचा